आकाशवाणी

दिनाङ्क :- 01.07.2025　　　　　　　　　　　　　　　　　　　　　　प्रात: - 06:55

**राष्ट्रपतिः/गोरखपुर यात्रा**

राष्ट्रपतिः पदासीना द्रौपदी मुर्मु: इत्येषा यून: वैद्यान् समाजस्य तेभ्यः वर्गेभ्यः कार्यं कर्तुं निवेदितवती येभ्यः चिकित्सा-सेवा सर्वाधिकं अपेक्षिता, अपि च अनेकेषु ग्रामीण-जनजातीय-क्षेत्रेषु अद्यापि उच्च-गुणवत्तायुक्त-स्वास्थ्य-सेवाया: अभावः अस्ति इत्यपि सा अवोचत्। एम्स गोरखपुर इत्यस्य प्रथमदीक्षान्तसमारोहं सम्बोधयन्ती सा वैद्यान् चिकित्सक-रोगिसंवादविषयं अवगन्तुं निवेदितवती सममेव उक्तवती यत् वैद्या: उपचारे करुणायाः भूमिकां जानीरन्। इत: पूर्वं राष्ट्रपतिः पदासीना द्रौपदी मुर्मु: उत्तरप्रदेशस्य बरेलीनगरे भारतीय-पशु-चिकित्सा-संशोधन-संस्थाया: एकादशतमं दीक्षातसमारोहं सम्बोधितवती।

**प्रधानमन्त्री-विदेशमन्त्रालयः**

प्रधानमन्त्री नरेन्द्रमोदी बुधवासरात् आरभ्य घाना, त्रिनिदाद टोबैगो, अर्जेन्टिना, ब्राजील, नामिबिया इति पञ्चराष्ट्रानां यात्रायां भविष्यति। नवदिल्ल्यां विशिष्ट-वार्ताहर-संवादं सम्बोधयन् विदेशमन्त्रालयस्य आर्थिकसम्बन्धसचिवः दम्मूरविः अवदत् यत् प्रधानमन्त्री पञ्चराष्ट्राणां यात्रायाः प्रथमे चरणे आगामिमासस्य द्वितीय-तृतीय-दिनाङ्के घानादेशस्य यात्रां करिष्यति। एतत् तस्य प्रथमा द्विपक्षीया घानादेशस्य यात्रा भविष्यति। सः अवदत्, यत् श्रीमोदी घानादेशस्य राष्ट्रपतिना सह वार्तालापं करिष्यति। द्वयोः राष्ट्रयोः सशक्तद्विपक्षीयसहभगितायाः समीक्षा भविष्यति तथा च आर्थिक, ऊर्जा, रक्षासहकार्यं, विकाससहकार्यसहभगितां च वर्धयितुं बहुविधचर्चा भविष्यति।

**डॉ. जयशंकरः-अमेरिका यात्रा**

विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकरः अमेरिका देशस्य पञ्चदश्यां यात्रायां गमिष्यति। अमेरिकादेशीय विदेश मन्त्रिणः मार्को रूबियो इत्येतस्य निमन्त्रणे त्रिदिवसीयायां आधिकारिक्यां यात्रायां डॉ. जयशंकरः अमेरिकादेशं सम्प्राप्नोत्। एतद्-यात्रान्तर्गतं डॉ. जयशंकर अद्य समायोक्ष्यमाणे क्वाड-विदेशमन्त्रिणाम् उपवेशने भागं ग्रहीष्यति। विदेशमन्त्रालयस्य वक्तव्यानुसारेण क्वाड समूहः हिन्दप्रशान्ताय सामूहिक दृष्टिकोणस्य संवर्द्धनाय नव प्रस्तावेषु ध्यान-केन्द्रीकरणं करिष्यति। अवधेयं यत् एतत् उपवेशनं पहलगाम आक्रमणानन्तरं क्वाड-मन्त्रिणां प्रथमम् उपवेशनं स्यात्।

**अमितशाह: - मन्थन**

केन्द्रीय गृहमन्त्री अमितशाह: नव देहल्यां "मन्थनोपवेशनस्य अध्यक्षतां अकरोत्। एषः कार्यक्रमः पंचविशत्युत्तर द्विसहस्र तम वर्षस्य अन्ताराष्ट्रीयसहकार वर्षस्य उत्सवस्वरूपेण आयोज्यते। सः उक्तवान् यत् प्रधानमन्त्रिणा नरेन्द्रमोदिना सहकारितामन्त्रालयस्य स्थापना कृता, येन देशे दीर्घकालपरम्परारूपेण विद्यमानस्य सहकारभावस्य वर्तमानपरिप्रेक्ष्ये च पुनरुत्थानं क्रियते।

**भारतीय ऋतु विज्ञानविभाग**

भारतीय ऋतु विज्ञानविभागेन इदं पूर्वानुमानं प्रदत्तं यत् सम्पूर्णदेशे जुलाईमासस्य मासिकसामान्यवृष्टिः सामान्यात् अधिकं भविष्यति। भारतीय ऋतु विज्ञानविभागस्य महानिर्देशकः डॉ. मृत्युञ्जयमोहेपात्र इत्यनेन आभासिके पत्रिकासम्मेलने उक्तं यत् देशस्य अधिकांशभागेषु सामान्यादधिकं वर्षा सम्भाव्यते। सः एतद् अपि अवदत् यत् जुलईमासे पूर्वोत्तरभारतस्य, पूर्वभारतस्य च अधिकांशभागेषु, तथा दक्षिणभारतीय द्वीपस्य दक्षिणभागेषु, उत्तरपश्चिमभारतस्य च कतिपयप्रदेशेषु सामान्यतः न्यूनवृष्टिः स्यात्।

।। इति वार्ता:।।